**दिनाङ्क :- 10.08.2026**

**प्रातः - 06:55**

## <u>प्रधानमन्त्री - राष्ट्रमण्डलक्रीडा - पदकविजेतारः</u>

प्रधानमन्त्री नरेन्द्रमोदी ह्यः नवदिल्ल्यां स्वनिवासे विंशतिः षड्विंशतिः इत्यस्य राष्ट्रमण्डलक्रीडायाः पदकविजेतृभिः सह मिलितवान्। संवादसमये पदकविजेतारः प्रधानमन्त्रिणा सह क्रीडायाः स्वानुभवान् निवेदितवन्तः। सामाजिकसञ्चारपटले प्रकाशिते एकस्मिन् सन्देशे श्रीमोदी अवदत् यत् तेषाम् एकैकः अपि असाधारणप्रदर्शनेन राष्ट्रं गौरवान्वितवान् तथा तेषां सफलता बहून् यूनः प्रेरयिष्यति। श्रीमोदी एकं दृश्यश्रव्यसन्देशम् अपि प्रकाशितवान् अथ अवदत् यत् ये क्रीडकाः भविष्ये क्रीडासु भागं ग्रहीष्यन्ति, ते प्रगतिं करिष्यन्ति। असौ नागरिकान् भारतस्य सदैव उत्साहवर्धनं कर्तुम् आहूतवान्।

**NARENDRA MODI**

अस्मिन् अवसरे युवकार्याणां क्रीडामन्त्री मनसुखमाण्डविया तथा युवकार्य-खेलराज्यमन्त्री रक्षा निखिल-खडसे च उपस्थिते आस्ताम्।

## <u>हर घर तिरङ्गा</u>

देशस्य सर्वेषु भागेषु 'हर घर तिरङ्गा' इत्यभियानं देशभक्तेः, राष्ट्रैकतायाः भारतस्य च समृद्धसांस्कृतिकपरम्परायाः प्रोत्साहनाय आयोज्यते।

अभियानमिदं द्वाविंशत्यधिक-द्विसहस्रतमे वर्षे प्रारब्धस्य 'हर घर तिरङ्गा' इत्युपक्रमस्य पञ्चमवर्षम् अस्ति। अनेन अभियानेन नागरिकाः राष्ट्रध्वजं प्रस्थापयितुं तथा देशभक्तेः राष्ट्रैकतायाश्च भावनां प्रकटयन्तीषु विविधासु गतिविधिषु भागं ग्रहीतुं प्रोत्साहयन्ते। अस्मिन् वर्षे अभियानम् विशेषत्वेन महत्त्वपूर्णम् अस्ति, यतः इदं भारतस्य राष्ट्रगीतस्य 'वन्दे मातरम्' इत्यस्य सार्धैकशततम-वर्षपूर्त्या सह आयोज्यते। अनेन राष्ट्रध्वजस्य राष्ट्रगीतस्य च विशिष्टः समागमः भवति। प्रधानमन्त्री नरेन्द्रमोदी नागरिकान् अभियाने सक्रियतया भागं ग्रहीतुं अथ विकसितभारतस्य निर्माणे स्वप्रतिबद्धतां पुनर्नवीकर्तुम् च आहूतवान्।

## **दिल्ली मेट्रो - हर घर तिरङ्गा**

दिल्ली-मेट्रो-रेल-निगमेन स्वातन्त्र्यभावनायाः उत्सवस्य भागरूपेण पीतवर्णमार्गे 'हर घर तिरङ्गा' इति विषयवस्तुना सुसज्जिता विशेषा मेट्रोरेलयानसेवा प्रारब्धा।

सामाजिकसञ्चारपटले प्रकाशिते एकस्मिन् सन्देशे डी.एम्.आर्.सी. इत्यनेन कथितं यत् भारतस्य अशीतितमे स्वातन्त्र्यदिवसोपलक्ष्ये आयोज्यमानानां सप्ताहव्यापिनां कार्यक्रमाणां भागरूपेण एषा विशेषा मेट्रोरेलसेवा प्रारब्धा।

## **ओडिशा - जलाप्लावनप्रकोपः**

ओडिशा-राज्ये पुनः प्रचण्डवृष्टेः अनन्तरं, राज्यस्य अनेकेषु भागेषु नदीनां वर्धमानः स्तरः, नूतनः जलाप्लावनप्रकोपः जनयति। बैतरणी-नदी अस्य प्रावृट्कालस्य तृतीये जलाप्लावन-प्रकोपे प्रविष्टवती अस्ति। एकया नूतन-न्यून-चाप-व्यवस्थया सम्पूर्णे राज्ये अतिवृष्टिः अभवत्। अधिकारिणः जलाप्लावन-प्रवण-क्षेत्रेषु नदीस्तरस्य निरीक्षणं निकटतया कुर्वन्तः सन्ति, आवश्यकान् समाह्वान-निवारकोपायान् च कुर्वन्तः सन्ति।

**भारोत्तोलन - प्रतिस्पर्धा**

भारतीयः भारोत्तोलकः महाराजन् अरुमुगा-पाण्डियन् उज्बेकिस्तानस्य ताश्कन्द-नगरे एशियन्-जूनियर्-वेटलिफ्टिंग-चैम्पियन्शिप् इत्यस्यां स्पर्धायां पुरुषाणां पञ्चषष्ठी कि.ग्रा. मिते भारवर्गे रजतपदकं प्राप्तवान्।